.. gurUtatvavivechanam ..

# ॥ गुरूतत्वविवेचनम् ॥

अन्धेनाऽन्धीकृतं विश्वं सचक्षुस्तु सचक्षुषम् ।
दिदृक्षा चेद्गज त्वं तु देशिकेन्द्रं सचश्रुषम् ॥ १॥
अन्धस्य गुरूरेकाक्षस्तस्य द्व्यक्षो गुरूर्मतः ।
द्व्यक्षाणामपि सर्वेषां गुरूस्त्र्यक्षो न तत्समः ॥ २॥
सहस्राक्षादयः सर्वे द्व्यक्षा एव हि केवलम् ।
कार्यध्येय-दृशो यस्मात् त्र्यक्षशिष्यपदे स्थिताः ॥ ३॥
त्र्यक्षस्तु भगवानादिपुरूषः शंकरो भवः ।
सृष्ट्वा सर्वाणि भूतानि कायमध्येऽथ सदिशन् ॥ ४॥
उभयातीतममलं तृतीयांक्षस्य गोचरम् ।
ददाति प्रार्थितस्तुष्टः श्रीगुरूः परमेश्वरः ॥ ५॥
स आदिनाथो भगवाननादिर्ज्ञानाम्बुधिः स्वात्मरतिर्महात्मा ।
श्रीदेशिकेन्द्रः करूणाम्बुराशिर्नानास्वरूपैश्चरतीह लोके ॥ ६॥
क्वचिच्च किंचित् कुरूते मनस्वी क्वचिन्न किंचित् कुरूते प्रमत्तः ।
बालो यथा क्रीडति सर्वलोके तथैव स क्रीडति पामरेषु ॥ ७॥
स लभ्यते केनचिदेव पुंसा विज्ञायते केनचिदेव पुंसा ।
प्रस्तूयते केनचिदेव पुंसा शृणोति वा तं स नरोऽपि धन्या ॥ ८॥
॥ इति श्रीकृष्णानन्दयतिविरचितं गुरूतत्वविवेचनं सम्पूर्णम् ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001